1

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीगणेशायनमः वज्रसूचीं प्रवक्ष्यामि शास्त्रम
ज्ञानभेदनम् दूषणं ज्ञानहीनानां भूषणं ज्ञा
नचक्षुषाम् १ ब्राह्मणक्षत्रियवैश्यशूद्राश्च
त्वारोवर्णास्तेषांब्राह्मणः प्रधान इतिवेदव
चनानिरूपितं स्मृतिभिरुक्तम् तत्रचोद्यम
१ स्तिकोब्राह्मणोनाम किंजीवः किंदेहः किं १
वर्णः किंकर्म किंजातिः किंपाण्डित्यं किं
धर्मः किंधार्मिकइत्यनेकेविकल्पाः तत्रप्र
थमंजीवोब्राह्मणइतिचेत्तर्हि सर्वस्यापिज
नस्यजीवस्यैकरूपत्वात्जीवोनब्राह्मणो
भवत्येव अन्यच्च देहोब्राह्मणइतिचेत्तर्हिब्रा

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

पस्तदर्द्धं वैश्यस्तदर्द्धं शूद्रस्तदर्द्धमिति नियमाभा
वात्तस्मात्कर्म ब्राह्मणो न भवत्येव अन्यच्च ज्ञा
ति ब्राह्मण इति चेत्तर्हि अन्यजातेः समुद्भवम
हर्षयो बहवः संतीति ऋषिः शृंगो मृग्यां कौ
शिकः कुशस्तंबाद् गौतमः शशपृष्ठे वा
२ ल्मीकिः वल्मीके व्यासः कैवर्तक्यां वशिष्ठो २
वेश्यायां विश्वामित्रः क्षत्रियायां अगस्तिः
कलशाज्जात इति श्रुतेः एतेषां जातिहीना
2 नामपि सम्यक् ज्ञान विशेषा ब्राह्मण्यमुत्त
मं श्रूयते तस्माद् जातिरेव ब्राह्मणो न
भवत्येवि अन्यच्च पाण्डित्यं ब्राह्मण इति चे

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

स्नगादिचाण्डालपर्यन्तमनुष्याणां देहस्य ज
रामरणधर्मदर्शनात्तस्माद्देहो ब्राह्मणो नभव
त्येव पुनर्देहो ब्राह्मणः इति चेन्नहि पितृमातृ
शरीरदहनात् पुत्राणां ब्रह्महत्यादिदोषसं
भवस्तस्माद्देहो ब्राह्मणो नभवत्येव अन्य
च्च वर्णो ब्राह्मण इति चेन्नहि ब्राह्मणः श्वेत
वर्णः क्षत्रियो रक्तवर्णः वैश्यः पीतवर्णः
शूद्रः कृष्णवर्णः एतेषां सर्वेषां वर्णानां ब्रा
ह्मणवर्णदर्शनात्तस्माद्वर्णो ब्राह्मणो नभव
त्येव अन्यच्च कर्म ब्राह्मण इति चेन्नहि ब्रा
ह्मणः [illegible] कर्माणि [illegible]

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

शमदमादिसंतोषमानमात्सर्यदंभाशामोहादिदुष्टापनि
वर्तकः स एव ब्राह्मण उच्यते नतु वेषधराः तथाहि
जन्मनाजायते शूद्रो व्रतबंधात् द्विज उच्यते वेदाभ्या
सी भवेद्विप्रो ब्रह्म जानाति ब्राह्मणः अत एव ब्रह्मवे
द ब्राह्मणो नान्यो वेति निश्चयः कर्मयोगिनो विद्वां
सोऽन्तरात्मसुखालयम् सत्यवैकुंठ कैलाश क्षीरा
२ ब्धिभैरवस्तथा विश्वरूपं च चैतन्यमात्ममाया २
स्वरूपकम् मायापरं भवेद्ब्रह्म तत्परं ब्रह्मकेवलं
3 योगीदेहाभिमान्येव भोगी कर्मफलितत्परः ज्ञानी
सोऽहमभिमान्येवतत्त्वज्ञानाभिमानिता किंकरो
मि क्व गच्छामि किं गृह्णामि त्यजामि किम् आत्म
नापूरितं सर्वं महाकल्पाम्बुना यथा किंतु केचि
द् वदंति सारमेव वस्तुज्ञानं मोक्षः केचिद् वदंति

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

तर्हि क्षत्रियवैश्यशूद्रादयोपि पदपदार्थवाक्य
प्रमाणविज्ञा बहवः संति तस्मात्पाण्डित्यं ब्राह्म
णो न भवत्येव अन्यच्च धर्मो ब्राह्मण इति चे
तर्हि क्षत्रियवैश्यशूद्रादयोपि इष्टपूर्तिधर्म
कारिणो बहवः संति तस्माद्धर्मो ब्राह्मणो न
भवत्येव अन्यच्च धार्मिको ब्राह्मण इति चे
तर्हि क्षत्रियवैश्यशूद्रादयोपि कन्यादान
गजदान गोदान महिषीदानदातारो ब
हवः संति तस्माद्धार्मिको ब्राह्मणो न भवत्ये
व किं तु कृतं जामदग्न्यमिव परशुपरशुरामेण
ा कृतार्थः तथा कामराग द्वेषादि रहितः

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

आवाहनद्यनैरेव मोक्षः केचित्स्थावरजंगमजात्य
हिंसा क्लेशोत्थात्माभ्यासादेव मोक्षः इत्येवं संकल्पनिक
ल्पानुसारिणो दर्शनभेदा बहवः संति तर्हि न भवति मो
क्षः एवं सर्वेषामिति किंतु पे महावाक्यविवरणो नो
के सम्यग्विचारिते स्वरूपोऽयं प्रपंचः नत्वं दशावद
वाच्यं श्रापरित्यज्य शुद्ध लक्षणात्तमङ्गीकृत्य पजीवे
श्वरयोरैक्यं स एव मोऽक्षः सकपं इत्यंयथा महदा
काशस्य घटमठोपाधिर्विषयते तस्य प्रध्वंसे महदाका
श सिद्धं तथा जीवपरमात्मनोरैक्यं स एव मोक्षः
सिद्धः तथाहि वेदान्ता वहुतर्ककर्कशमतिग्रस्ता
परं मायया मंदाः कर्मकलाकुला हतधियोऽद्वैतेति
वैशेषिकाः अन्ये भेदरता विवादकलहास्ते तत्त्व
तो वंचितास्तस्मात्सिद्ध मतस्वभासकमपं धीरः
परं संश्रयेत नानाद्वीपमतान्तवादपटवो

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

निरावरणगुणातीतवस्तुज्ञानंमोक्षः केचित् वदंति
साकारगास्य विनाशोक्ति निराकारस्पशून्यतोभयप
त्तिहीनावस्तुज्ञानंमोक्षः केचिदेकदेशिकसिद्धा
न्तकथितभक्तिविधानंमोक्षः केचिदकुलाकुल
स्याचारनानाकरणादिवर्जितंमोक्षः केचिन्म
नोवचनध्यानधारणांमोक्षः केचिद्रूपाद्रूपो
भयज्ञानभावोमोक्षः केचिन्महावाक्यविचा
रणांमोक्षः केचिन्मद्यमांसास्वादनांकुरक्रीडा
विलासविभ्रमानन्दभावोमोक्षः केचिदस्तिना
स्ति इत्युभयज्ञानविनिर्णयोमोक्षः केचित्सोऽहंभा
वलक्षणंमोक्षः केचित्स्वात्मानन्दबोधमयो
मोक्षः केचिज्जगत्स्थापनभस्मोद्धूलनमोक्षः
...
CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

काश्चतुराः स्वकेलिनिपुणा देहात्मवादेरताः सर्वे
षांमतिरस्ति दुःसहपराद्वैतेपराशक्तिकाः कर्त्तारंप्र
भजंतिवाजनरतानामूलेषु येनिंद्यास्तेषामादिक
केष्वेवविफलंनैवास्तिमोक्षंपरम् ५ इदानी
माह वाक्यार्थसुखंनबोधःकुप्यते यमनिय
५ माद्यसाधनसंपन्नानामधिकारिणामनुग्रह
य. अहिंसासत्यमस्तेयब्रह्मचर्य्यापरिग्रहाः ५
एतेपंचयमाः शौचसंतोषस्वाध्यायस्तपईश्व
(5 रप्रणिधानानिनियमाः तत्रमहावाक्यार्थः
तत्त्वंपदंचेतिपदद्वयमस्ति तत्पदस्य वाच्यार्थः
त्वंपदस्यलक्ष्यार्थंकथयामि तत्पदस्यवाच्यार्थः
मायोपाधिसकलजगदुत्पत्तिस्थितिप्रलयकार
णः तत्त्वात्सर्वज्ञः सर्वेश्वरत्वात्सर्वशक्तिमान्

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

भयान्धकारावृताः सांख्यायै स्व दैदिकाविधिपराः
संन्यासिनः स्नातकाः सौरा नित्यपराः प्रपंचनिरता
योधान्विताः श्रावकाः एते कष्टरताः क्रियापापपरा
नासोन स्वतो वञ्चिताः शैवाः पाशुपता महाव्र
तधराः कालीमुखा जंगमा गाणेशाः सकलेष्टदं
गणपतिं व्यापनिचितेऽनिशम् शान्ताः कौल
कुलाभ्यर्चनरताः कापालिकाः शांभवाः एते
बाह्यपिभंजनं न निरता तो लत्व तो वंचिताः ३
तस्मात् आचार्यो बहुरीतिना बहुधा नग्नव्रती
स्तापसा नाना तीर्थ निषेवकाः जपपरा मौनाः
स्थिता नित्यपराः नित्यं चापशनादिना त्म
स्व भेदनावधानाः परे एते ते खलु दुःखभा
[illegible] वंचिताः ४ तस्मात् आचार्य

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

नात्मकश्चतुर्दशसहितः सत्वरजस्तमो गुणाः अन्न
मयप्राणमयमनोमयविज्ञानमयआनन्दमयश्चे
ति एतैः पंचकोशैः सहितः आधिदैविकाधिभौति
काध्यात्मिकाः तापत्रयसहितः सत्वरजस्तमो
गुणात्रयसहितः पुत्रैषणावित्तैषणालोकैषणा
त्रयसहितः भूतभविष्यवर्त्तमानकालत्रयसहि
तः अशनतृष्णाशोकमोहजन्ममरणषडूर्मिस ६
हितः अस्ति जायते वर्द्धते विपरिणमते अपक्षी
यते विनश्यति एतैः षड्भावविकारसहितः
इतित्वंपदस्यवाच्यार्थः अथत्वंपदस्यलक्ष्यार्थः
कथ्यते सर्वप्राणापाल्यः स्थितम् अद्वितीयंचैत
न्यं त्वंपदस्यलक्ष्यार्थः एतत्प्रत्यक् चैतन्यमेव
सत्यं ज्ञानमानन्दाद्वितीयंचैतन्यं अतस्तदेवाह

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

सर्वकामप्रदश्च परोक्षेणासह वर्त्तमानः सत्यंज्ञान
मानन्दमद्वयद्वितीयं चैतन्यमयं तत्पदवाच्यार्थेति
सर्वज्ञः सर्वेश्वरत्वात्सर्वशक्तिमान् सर्वकामप्रदो
भवति अपरोक्षेणासहवर्त्तमानो भवति किंतु
केवलं सत्यं ज्ञानमानन्दमद्वितीयं स्वरूपं चैतन्य
मयं तत्पदलक्ष्यार्थ इति त्वंपदस्य वाच्या
र्थः कथ्यते श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणपंचज्ञा
नेन्द्रियसहितः वाक्पाणिपादपायूपस्थं पंच
कर्मेन्द्रियसहितः प्राणापानव्यानसमानोदाना
गकूर्मकृकलदेवदत्तधनंजयादशवायवः
सहितो मनोबुद्धिचित्ताहंकारान्तःकरणचतु
ष्टयः सहितः शब्दस्पर्शरूपरसगंधपंचविष
[illegible]

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

सत्यं ज्ञानमनन्तं ब्रह्मेति पञ्चन्ति सत्यमित्येकं ब्रह्म
ज्ञानमित्येकं ब्रह्म आनन्दमित्येकं ब्रह्मविज्ञान
न्ति ब्रह्मविदोसत्यमेकमत्रेति स्वप्रकाशः सगुणराह
सत्यशब्देन ज्ञानशब्देन तृप्तिरूपमुच्यते अनन्तश
ब्देनाधराऽमुच्यते ब्रह्मशब्देन परिपूर्णतोच्यते
एवमेवाद्वितीयं चैतन्यं ब्रह्म तत्त्वमसि ब्रह्मा
 हमस्मि अहं ब्रह्मास्मि इति ज्ञात्वा प्रबुद्धानहेत
 हत्वोभवत्येव ब्रह्मैव सन् ब्रह्माप्येति विमुक्त
श्चविमुच्यते इत्यादिश्रुतिभिरेव स निश्चयात्म
बुद्धः सजीवन्मुक्तः प्रारब्धकर्मजनितफलावशि
लोकानुग्रहं कुर्वते चरति तिष्ठतः पद्यपाऽ ज्ञात्वाप्यस
र्पिसर्पोऽल्पं पपाकं पंनलुंचति विध्वस्ताखिलमो
हापि स्रोहकार्यं रतः पात्मनी १ इति श्रीमच्छंकरा
चार्यविरचितायामुपनिषत्सुबोधिन्यां वज्र
सूची समाप्ता शुभमस्तु शुभं भूयात् संवत् १८६४
चैत्रमासे शुक्लेपक्षे ६ गीर्पांगुरुवासरे [illegible]

CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham



CC-0. Lal Bahadur Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham